"कान्तारस्तापसेक्षुश्च काष्ठेक्षुः सूचिपत्रकः ॥"
"इत्येता जातयः स्थौल्यात् गुणान् वक्ष्याम्यतः परम् ॥"
"कान्तारतापसाविक्षू वंशकाद्गुणौ मतौ ॥")

तापसतरुः, पुं, (तापसप्रियस्तरुर्वृक्षः ।) इङ्गुदीवृक्षः । इत्यमरः । २ । ४ । ४६ ॥ (इङ्गुदीशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

तापसद्रुमः, पुं, (तापसप्रियो द्रुमः ।) इङ्गुदीवृक्षः । इति हेमचन्द्रः । ४ । २०६ ॥ (पर्य्यायोऽस्य यथा,—
"इङ्गुदीऽङ्गारवृक्षश्च तिक्तकस्तापसद्रुमः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

तापसद्रुमसन्निभा, स्त्री, (तापसद्रुमस्य सन्निभा समा ।) गर्भदात्रीक्षुपः । इति राजनिर्घण्टः ॥

तापसप्रियः, पुं, (तापसानां प्रियः ।) प्रियालवृक्षः । इति राजनिर्घण्टः ॥ (इङ्गुदीवृक्षः । यथा, वैद्यकरत्नमालायाम् ।
"पीतपुष्पोऽङ्गारपुष्प इङ्गुदी तापसप्रियः ॥")

तापसप्रिया, स्त्री, (तापसानां प्रिया ।) द्राक्षा । इति राजनिर्घण्टः ॥ (द्राक्षाशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

तापहरी, स्त्री, (तापं वह्निजन्यसन्तापं हरतीति । हृ + बाहुलकात् टः । स्त्रियां ङीप् ।) व्यञ्जनविशेषः । यथा,—
"घृते हरिद्रासंयुक्ता माषाणां भर्जयेद्वटीः ।
तण्डुलांश्चापि निर्धौतान् सहैव परिभर्जयेत् ॥)
सिद्धियोग्यं जलं तत्र प्रक्षिप्य कुशलः पचेत् ।
लवणार्द्रकहिङ्गूनि मात्रया तत्र निःक्षिपेत् ॥
एषा सिद्धिं समायाता प्रोक्ता तापहरी बुधैः ॥"
अस्या गुणाः ।
"भवेत्तापहरी बल्या वृष्या श्लेष्मायमाचरेत् ।
वृंहणी तर्पणी रुच्या गुर्व्वी तत्र गुणाः स्मृताः ॥"
ताहरी इति लोके । इति भावप्रकाशः ॥
तापहारिण्यां त्रि ॥

तापिच्छः, पुं, (तापिनं सन्तप्तं छदति आच्छादयतीति । छद् + अन्येष्वपीति डः । पृषोदरादित्वात् साधुः ।) तमालवृक्षः । इत्यमरः । २ । ४ । ६८ ॥ (यथा, गीतगोविन्दे । ११ । ११ ।
"अक्ष्णोर्निक्षिपदञ्जनं श्रवणयोस्तापिच्छगुच्छावलीम् ॥"
क्ली, तापिच्छस्य पुष्पम् । फले लुगिति तद्धितलुक् । द्विहीनं प्रसवे सर्व्वमिति नपुंसकत्वम् । तापिच्छपुष्पम् । यथा, माघे । १ । २२ ।
"प्रफुल्लतापिच्छनिभैरभीषुभिः
शुभैश्च सप्तच्छदपांशुपाण्डुभिः ॥")

तापिञ्जं, क्ली, (तापिनं जयतीति । जि + डः ।) धातुमाक्षिकम् । इति राजनिर्घण्टः ॥

तापिञ्जः, पुं, तापिच्छः । इत्यमरटीकायां भरतः ॥

तापी, स्त्री, (तापयतीति । तप + णिच् + अच् । गौरादित्वात् ङीष् ।) तापिनी नदी । सा पश्चिमवाहिनी विन्ध्याचले प्रसिद्धा । इति राजनिर्घण्टः ॥ (यथा, मात्स्ये । ११३ । २७ ।
"तापी पयोष्णी निर्व्विन्ध्या क्षिप्रा च ऋषभा नदी ।
विन्ध्यपादप्रसूतास्ताः सर्व्वाः शीतजलाः शुभाः ॥"
इयं सह्यपादोद्भवा इति विष्णुपुराणम् । २ । ३ । ११ ॥
"तापी ताप्ता च गोलोमी गोमती शालिता मही ।
सरस्वती युता नद्यो नर्म्मदा पश्चिमानुगाः ॥
आसां जलं घनं शीतं पित्तघ्नं कफकृत्तथा ।
वातदोषहरं हृद्यं कण्डुकुष्ठविनाशनम् ॥"
इति हारीते प्रथमे स्थाने सप्तमेऽध्याये ॥)
यमुना । इति त्रिकाण्डशेषः ॥

तापी, [न्] (तापोऽस्यास्तीति । ताप + "अत इनिठनौ ।" ५ । २ । ११५ । इति इनिः ।) बुद्धः । इति त्रिकाण्डशेषः ॥ तापयुक्ते, त्रि ॥

ताप्यं, क्ली, (तापे हितम् । ताप + यत् ।) धातुमाक्षिकम् । इति रत्नमाला ॥ हेमचन्द्रे पुंलिङ्गोऽयम् । ४२१ ॥ (यथा, भावप्रकाशे ।
"ताप्यस्य मलत्रितयं हे लोहश्रावणीकायाः ॥")

ताप्यकं, क्ली, (ताप्यमेव । स्वार्थे कन् ।) माक्षिकम् । इति राजनिर्घण्टः ॥ (माक्षिकशब्दे विवृतिरस्य ज्ञेया ॥)

ताप्युत्थसंज्ञकं, क्ली, (ताप्युत्थासंज्ञा यस्य । कप् ।) माक्षिकधातुः । इति रत्नमाला ॥

तामः, पुं, (ताम्यत्यनेनेति । तम + करणे घञ् ।) भीषणः । दोषः । इत्यजयपालः ॥

तामरं, क्ली, (तामं ग्लानिं रातीति । रा + कः ।) जलम् । घृतम् । इति भरतधृतरुद्रः ॥

तामरसं, क्ली, (तामरे जले सस्तीति । सस् + डः । यद्वा, बाहुलकात् अमेरप्यसच् । तस्य णित्त्वञ्च । धातोस्तुगागमश्च । णित्वात् वृद्धिः । इत्युज्ज्वलदत्तः । ३ । ११७ ॥) पद्मम् । (यथा, राजेन्द्रकर्णपूरे । ५४ ।
"जाता तामरसोदरे भगवतो धातुः सतार्या स्थितिः ॥")
सारसः । इत्यमरः । १ । १० । ४० ॥ स्वर्णम् । ताम्रम् । इति मेदिनी । से, ५३ ॥ (द्वादशाक्षरच्छन्दोविशेषः । तस्य लक्षणादिकं छन्दःशब्दे द्रष्टव्यम् ॥)

तामलकी, स्त्री, भूम्यामलकी । इत्यमरः । २ । ४ । १२७ ॥ (यथा, सुश्रुते उत्तरतन्त्रे ३९ अध्याये ।
"कटुकेन्द्रयवोशीरसिंही तामलकीघनैः ॥")

तामलिप्तं, क्ली, } देशविशेषः । तमलुक् इति
तामलिप्ती, स्त्री, } भाषा ॥ तत्पर्य्यायः । दामलिप्तम् २ तामलिप्ती ३ तमालिनी ४ स्तम्बपूः ५ विष्णुगृहम् ६ । इति हेमचन्द्रः । ४ । ४५ ॥ तमोलिप्ती ७ वेलाकूलम् ८ तमालिका ९ । इति त्रिकाण्डशेषः ॥

तामसं, त्रि, (तम एव । तमस् + स्वार्थे अण् ।) प्रकृतिगुणविशेषः । तद्धर्म्मा यथा,—
"त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥
यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः ।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥
यातयामं गतरसं पूतिपर्य्युषितञ्च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥
विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥
मूढ़ग्राहेणात्मनो यत् पीड़या क्रियते तपः ।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥
अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥"
इति श्रीभगवद्गीतायां १७ अध्यायः ॥ * ॥
किञ्च तत्रैव १८ अध्याये ।
"नियतस्य तु सन्न्यासः कर्म्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः ॥
यत्तु कृत्स्नवदेकस्मिन् कार्य्ये सक्तमहेतुकम् ।
अतत्त्वार्थवदल्पञ्च तत्तामसमुदाहृतम् ॥
अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम् ।
मोहादारभ्यते कर्म्म यत्तत्तामसमुच्यते ॥
अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः ।
विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते ॥
अधर्म्मं धर्म्ममिति या मन्यते तमसावृता ।
सर्व्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ ! तामसी ॥
यया स्वप्नं भयं शोकं विषादं मदमेव च ।
न विमुञ्चति दुर्म्मेधा धृतिः सा तामसी मता ॥
यदग्रे चानुबन्धे च सुखं मोहनमात्मनः ।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥"

तामसः, पुं, (तमस्तमोगुणः प्रधानत्वेनास्त्यस्येति । अण् ।) सर्पः । खलः । इति मेदिनी । से, २५ ॥ उलूकः । इति राजनिर्घण्टः ॥ चतुर्थमनुः । अस्मिन्मन्वन्तरे हरिनामा विष्णोरवतारः । त्रिशिखनामा इन्द्रः । वैधृतयो देवाः । ज्योतिर्धामादयः सप्तर्षयः । वृषख्यातिनरादयो मनुसुताः । इति श्रीभागवतम् ॥ * ॥ तमोगुणयुक्ते, त्रि ॥ (यथा, मनुः । १२ । ३३ ।
"लोभः स्वप्नोऽधृतिः क्रौर्य्यं नास्तिक्यं भिन्नवृत्तिता ।
याचिष्णुता प्रमादश्च तामसं गुणलक्षणम् ॥")
तामसमुनयो यथा । कणादः १ गौतमः २ शक्तिः ३ उपमन्युः ४ जैमिनिः ५ दुर्व्वासाः ६ मृकण्डुः ७ बृहस्पतिः ८ भार्गवः ९ जमदग्निः १० ॥ तामसशास्त्राणि यथा । असुरमोहनार्थशिवकृतशैवपाशुपतादि १ कणादकृतन्यायनीलपटादि २ ब्राह्मणरूपिभगवद्कृतबौद्धशास्त्रम् ३ जैमिनिकृतनिरीश्वरसांख्यम् ४ ॥ तामसपुराणानि यथा । मात्स्यम् १ कौर्म्मम् २ लैङ्गम् ३ शैवम् ४ स्कान्दम् ५ आग्नेयम् ६ ॥ तामसस्मृतयो यथा । गौतमम् १ बार्हस्पत्यम् २ सांवर्त्तम् ३ यमम् ४ शाङ्खम् ५ औशनसम् ६ ॥ * ॥ राजसतामसकर्म्माणि यथा,—
"यत् शैवं दैवतं पैत्रमौपदेवं तथाध्वरम् ।
शाक्तं शैवं गाणपत्यं यागहोमादिकं तथा ॥